CHODAYITRI (SARASWATI) GHANAM

1 चोदयित्री सूनृता॑नाꣳ सूनृता॑ना श्चोदयित्री चो॑दयित्री
सूनृता॑ना श्चेत॑न्ती चेत॑न्ती सूनृता॑ना श्चोदयित्री
2 चो॑दयित्री सूनृता॑ना श्चेत॑न्ती । सूनृता॑ना श्चेत॑न्ती चेत॑न्ती
सूनृता॑नाꣳ सूनृता॑ना श्चेत॑न्ती सुमतीनाꣳ सु॑मतीना श्चेत॑न्ती
सूनृता॑नाꣳ सूनृता॑ना श्चेत॑न्ती सुमतीनाम् ।

3 चेत॑न्ती सुमतीनाꣳ सु॑मतीना श्चेत॑न्ती चेत॑न्ती सुमतीनाम् ।
4, 5 सुमतीनामिति॑ सु = मतीनाम् ।। यज्ञन्द॑धे दधे यज्ञँ य्यज्ञन्द॑धे
6 सर॑स्वती सर॑स्वती दधे यज्ञँ य्यज्ञन्द॑धे सर॑स्वती । दधे सर॑स्वती
6a सर॑स्वती दधे दधे सर॑स्वती । सर॑स्व तीति सर॑स्वती ।।

7 पावी॑रवी कन्या॑ कन्या॑ पावी॑रवी पावी॑रवी कन्या॑ चित्रायु॑
श्चित्रायु॑ : कन्या॑ पावी॑रवी पावी॑रवी कन्या॑ चित्रायु॑ : ।
8 कन्या॑ चित्रायु॑ श्चित्रायु॑ : कन्या॑ कन्या॑ चित्रायु स्सर॑स्वती
सर॑स्वती चित्रायु॑ : कन्या॑ कन्या॑ चित्रायु स्सर॑स्वती ।

9 चि॒त्रायु॒ स्सर॑स्वती॒ सर॑स्वती चि॒त्रायु॑ श्चि॒त्रायु॒ स्सर॑स्वती
वी॒रप॑त्नी वी॒रप॑त्नी॒ सर॑स्वती चि॒त्रायु॑ श्चि॒त्रायु॒ स्सर॑स्वती
10 वी॒रप॑त्नी । चि॒त्रायु॒ रिति॑ चि॒त्र = आ॒यु॒ः ।
11 सर॑स्वती वी॒रप॑त्नी वी॒रप॑त्नी॒ सर॑स्वती॒ सर॑स्वती वी॒रप॑त्नी॒ धि॒य
न्धिय᳚ वी॒रप॑त्नी॒ सर॑स्वती॒ सर॑स्वती वी॒रप॑त्नी॒ धिय॑म् ।

12 वी॒रप॑त्नी॒ धिय॒ न्धिय᳚ वी॒रप॑त्नी वी॒रप॑त्नी॒ धिय॑न्धा॒द्धा
द्धिय᳚ वी॒रप॑त्नी वी॒रप॑त्नी॒ धिय॑न्धात् ।
13, 14 वी॒रप॒त्नीति॑ वी॒र = प॒त्नी॒ । धिय॑न्धा॒द्धा द्धिय॒ न्धिय॑ न्धात् ।
15 धा॒दिति॑ धात् ॥

16 ग्रा॒भि र॒च्छिं॑द्र मच्छिं॑द्र॒ङ् ग्रा॒भि ग्रा॑भि॒ रच्छिं॑द्रꣳ शर॒णꣳ
श॑र॒ण मच्छिं॑द्र॒ङ् ग्राभि॒ ग्रा॑भि॒ रच्छिं॑द्रꣳ शर॒णम् ।
17 अच्छिं॑द्रꣳ शर॒णꣳ श॑र॒ण मच्छिं॑द्र॒ मच्छिं॑द्रꣳ शर॒णꣳ
स॒जोषा॑॑ स्स॒जोषा॑॑ श्शर॒ण मच्छिं॑द्र॒ मच्छिं॑द्रꣳ
शर॒णꣳ स॒जोषा॑॑ : ।

18 शर॒णꣳ स॒जोषा॑॑ स्स॒जोषा॑॑ श्शर॒णꣳ श॑र॒णꣳ स॒जोषा॑
दुरा॒धर्ष॑ न्दुरा॒धर्षꣳ॑ स॒जोषा॑॑ श्शर॒णꣳ श॑र॒णꣳ स॒जोषा॑
19 दुरा॒धर्ष॑॑म् । स॒जोषा॑ दुरा॒धर्ष॑ न्दुरा॒धर्षꣳ॑ स॒जोषा॑॑
स्स॒जोषा॑ दुरा॒धर्ष॑ङ् गृण॒ते गृ॑ण॒ते दु॑रा॒धर्षꣳ॑ स॒जोषा॑॑
स्स॒जोषा॑ दुरा॒धर्ष॑ङ् गृण॒ते ।

20 सजोषा इतिस = जोषाः ।

21 दुराधर्षङ् गृणते गृणते दुराधर्ष न्दुराधर्षङ् गृणते शर्म
शर्म गृणते दुराधर्ष न्दुराधर्षङ् गृणते शर्म ।

22 दुराधर्ष मिति दु : = आधर्षम् ।

23 गृणते शर्म शर्म गृणते गृणते शर्मयꣳ सद्यꣳ सच्छर्म
गृणते गृणते शर्मयꣳ सत् ।

24 शर्मयꣳ सद्यꣳ सच्छर्म शर्मयꣳ सत् ।

25 यꣳस दिति यꣳसत् ॥

CHODAYITRI (SARASWATI) VAAKYAM

चोदयित्री सूनृता॑ना श्चेत॑न्ती सुमतीनाम् ।
यज्ञन्द॑धे सर॑स्वती ।
पावी॑रवी कन्या॑ चित्रायु स्सर॑स्वती वीरप॑त्नी धिय॑न्धात् ।
ग्नाभि रच्छि॑द्रꣳ शरणꣳ सजोषा॑ दुराधर्षङ् गृणते
शर्मयꣳ सत् ।

प्र णो॑ देवी सर॑स्वती वाजे॑भिर्वाजिनी॑वती ।
धीनाम॑ वित्र्य॑वतु ।।
आ नो॑ दिवो वृ॑हत : पर्वतादा सर॑स्वती यजता ग॑न्तु यज्ञम् ।
हव॑न्देवी जु॑जुषाणा घृताची॑ शग्मान्नो वाच॑मुशती शृ॑णोतु ।।

PDF created by Shri P R Iyer and Priya R Iyer
13 Nov 2021